


**Chinmaya Sudarshan**

8044 Goshen Road, Malvern, PA 19355




# श्री सुदर्शनाष्टकं

# Shri Sudarshana Ashtakam

### by Shri Vedanta Desika

**प्रतिभटश्रेणि भीषण वरगुणस्तोम भूषण जनिभयस्थान तारण जगदवस्थान कारण ।**
**निखिलदुष्कर्म कर्शन निगमसद्धर्म दर्शन जय जय श्री सुदर्शन जय जय श्री सुदर्शन ॥**

*pratibhatashreni bhishana,varagunasthoma bhushana,*
*janibhyasthana taarana, jagadavasthaana karana,*
*nikhiladushkarma karshana, nigamasaddharma darshana,*
*jaya jaya sri sudarshana, jaya jaya sri sudarshana - 1*

**शुभजगद्रूप मण्डन सुरगणत्रास खन्डन शतमखब्रह्म वन्दित शतपथब्रह्म नन्दित ।**
**प्रथितविद्वत् सपक्षित भजदहिर्बुध्न्य लक्षित जय जय श्री सुदर्शन जय जय श्री सुदर्शन ॥**

*subhajagadrupa mandana, suraganathrasa khandana*
*satamakhabrahma vandita, satapatabrahma nandita,*
*pradhitavidvat sapakshita, bhajata ahirbudhnya lakshita*
*jaya jaya sri sudarshana, jaya jaya sri sudarshana - 2*

**स्फुटतटिज्जाल पिञ्जर पृथुतरज्वाल पञ्जर परिगत प्रत्नविग्रह पटुतरप्रज्ञ दुर्ग्रह ।**
**प्रहरण ग्राम मण्डित परिजन त्राण पण्डित जय जय श्री सुदर्शन जय जय श्री सुदर्शन ॥**

*sphutata-dijjaala pinjara, pruthutarajwaala panjara*
*parigata pratnavigraha, padutaraprajna durgraha,*
*praharana graama manditha, parijana thraana panditha*
*jaya jaya sri sudarshana, jaya jaya sri sudarshana - 3*

**निजपदप्रीत सद्गण निरुपधिस्फीत षड्गुण निगम निर्व्यूढ वैभव निजपर व्यूह वैभव ।**
**हरि हय द्वेषि दारण हर पुर प्लोष कारण जय जय श्री सुदर्शन जय जय श्री सुदर्शन ॥**

*nijapatapreetha sadgana, nirupathispeetha shad guna*
*nigama nirvyuda vaibhava, nijapara vyuha vaibhava,*
*hari haya dweshi daarana, hara pura plosha kaarana*
*jaya jaya sri sudarshana, jaya jaya sri sudarshana - 4*

**दनुज विस्तार कर्तन जनि तमिस्रा विकर्तन दनुजविद्या निकर्तन भजदविद्या निवर्तन ।**
**अमर दृष्ट स्व विक्रम समर जुष्ट भ्रमिक्रम जय जय श्री सुदर्शन जय जय श्री सुदर्शन ॥**

*dhanuja visthaara kartana, janitamisraa vikartana*
*dhanujavidya nikartana, bhajatavidya nivatana,*
*amara drushtasva vikrama, samara jushta bramikrama*
*jaya jaya sri sudarshana, jaya jaya sri sudarshana - 5*

**प्रथिमुखालीढ बन्धुर पृथुमहाहेति दन्तुर विकटमाय बहिष्कृत विविधमाला परिष्कृत ।**
**स्थिरमहायन्त्र तन्त्रित दृढ दया तन्त्र यन्त्रित जय जय श्री सुदर्शन जय जय श्री सुदर्शन ॥**

*prathimukhaaleeta bandhura, pruthumahaheti danthura*
*vikatamaaya bahishkrutha,vividhamaalaaparishkrutha,*
*sthiramahaayantra tantritha, dhruta daya tantra yantrita*
*jaya jaya sri sudarshana, jaya jaya sri sudarshana - 6*

**महित सम्पत् सदक्षर विहितसम्पत् षडक्षर षडरचक्र प्रतिष्ठित सकल तत्त्व प्रतिष्ठित ।**
**विविध सङ्कल्प कल्पक विबुधसङ्कल्प कल्पक जय जय श्री सुदर्शन जय जय श्री सुदर्शन ॥**

*mahita sampath sadhakshara, vihitasampath shatakshara*
*shatarachakra prathishtita, sakala tattva prathishtita,*
*vividha sankalpaka kalpaka, vibhudhasankalpa kalpaka*
*jaya jaya sri sudarshana, jaya jaya sri sudarshana - 7*

**भुवन नेत्र त्रयीमय सवन तेजस्त्रयीमय निरवधि स्वादु चिन्मय निखिल शक्ते जगन्मय ।**
**अमित विश्वक्रियामय शमित विश्वग्भयामय जय जय श्री सुदर्शन जय जय श्री सुदर्शन ॥**

*bhuvana netra trayeemaya, savanatejastrayeemaya*
*niravadhisvaadhu chinmaya, nikhila sakthe jaganmaya,*
*amita viswakriyaamaya, samitavishvagbhayaamaya*
*jaya jaya sri sudarshana, jaya jaya sri sudarshana – 8*

**फलश्रुति**

**द्विचतुष्कमिदं प्रभूतसारं पठतां वेङ्कटनायक प्रणीतम् ।**
**विषमेऽपि मनोरथः प्रधावन् न विहन्येत रथाङ्ग धुर्य गुप्तः ॥**

*phala shruthi*
*dwichatushkamidam prabhoothasaaram padhathaam venkatanayaka praneetham,*
*vishamepi manoradha: pradhaavan na vihanyeta radhaanga dhurya guptah*

**॥इति श्री सुदर्शनाष्टकं समाप्तम् ॥ कवितार्किकसिंहाय कल्याणगुणशालिने ।**
**॥ श्रीमते वेन्कटेषाय वेदान्तगुरवे नमः ॥**

*iti shri sudarshana ashtakam samaptam*
*kavitarkika-simhaaya kalyaanagunashaaline*
*shrimad venkateshaye vedantgurve namah*